# Matripanchakam

# માતૃપઞ્ચકમ્

## Document Information

Text title : Matripanchakam

File name : mAtripanchakamSachidananda.itx

Category : panchaka, general

Location : doc_z_misc_general

Author : Sw. Sachidananda Tirtha (Bhashya Swami)

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description/comments : Five verses on Motherforms

Source : http://www.angelfire.com/ultra/matrupanchakam

Latest update : May 10, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# માતૃપઞ્ચકમ્

સચ્ચિદાનન્દતીર્થવિરચિતમ્

માતઃ સોઽહમુપસ્તિતોઽસ્મિ પુરતઃ પૂર્વપ્રતિજ્ઞાં સ્મરન્
  પ્રત્યશ્રાવિ પુરાહિ તેઽન્ત્ય સમયે પ્રાપ્તું સમીપં તવ ।
ગ્રાહગ્રાસમિષાધયા હ્યનુમતસ્તુર્યાશ્રમં પ્રાપ્તુવાન્
  યત્પ્રીત્યૈ ચ સમાગતોઽહમધુના તસ્યૈ જનન્યૈ નમઃ ॥ ૧॥

બ્રૂતે માતૃસમા શ્રુતિર્ભગવતી યદ્વાર્હદારણ્યકે
  તત્ત્વં વેત્સ્યતિ માતૃમાંશ્ચ પિતૃમાનાચાર્યવાનિત્યસૌ ।
તત્રાદૌ કિલ માતૃશિક્ષણવિધિં સર્વોત્તમં શાસતી
  પૂજ્યાત્પૂજ્યતરાં સમર્થયતિ યાં તસ્યૈ જનન્યૈ નમઃ ॥ ૨॥

અમ્બા તાત ઇતિ સ્વશિક્ષણવશાદુચ્ચારણપ્રક્રિયાં
  યા સૂતે પ્રથમં ક્વ શક્તિરિહ નો માતુસ્તુ શિક્ષાં વિના ।
વ્યુત્પત્તિં ક્રમશશ્ચ સાર્વજનિકીં તત્તત્પદાર્થેષુ યા
  હ્યાધત્તે વ્યવહારમપ્યવકિલં તસ્યૈ જનન્યૈ નમઃ ॥ ૩॥

ઇષ્ટાનિષ્ટહિતાહિતાદિધિષણાહીના વયં શૈશવે
  કીટાન્ શષ્કુલવિત્ કરેણ દધતો ભક્ષ્યાશયા બાલિશાઃ ।
માત્રા વારિતસાહસાઃ ખલુતતો ભક્ષ્યાણ્યભક્ષ્યાણિ વા
  વ્યજ્ઞાસિષ્મ હિતાહિતે ચ સુતરાં તસ્યૈ જનન્યૈ નમઃ ॥ ૪॥

આત્મજ્ઞાનસમાર્જનોપકરણં યદ્દેહયન્ત્રં વિદુઃ
  તદ્રોગાદિભયાન્મૃગોરગરિપુવ્રાતાદવન્તી સ્વયમ્ ।
પુષ્ણન્તી શિશુમાદરાદ્ગુરુકુલં પ્રાપય્ય કાલક્રમાત્
  યા સર્વજ્ઞશિખામણિં વિતનુતે તસ્યૈ જનન્યૈ નમઃ ॥ ૫॥

ઇતિ શ્રીમચ્છૃઙ્ગગિરિજગદ્ગુરુચરણસરોહસેવાસમાસદિતસારસ્વતવિભવલેશસ્ય
શ્રીશિવાનન્દતીર્થસ્વામિપૂજ્યપાદશિષ્યસ્ય શ્રીસચ્ચિદાનન્દતીર્થસ્ય
ભાષ્યસ્વામિનઃ ચ કૃતૌ માતૃપઞ્ચકમ્

॥ ॐ તત્સત્ ॥

http://www.angelfire.com/ultra/matrupanchakam

http://www.angelfire.com/ultra/matrupanchakam/info/poettml

---

*Matripanchakam*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*